# Shri Vagvadini Sahasranama Stotram

# શ્રીવાગ્વાદિનિસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : vAgvAdinIsahasranAmastotoram

File name : vAgvAdinIsahasranAmastotoram.itx

Category : sahasranAma, devii, sarasvatI, devI

Location : doc_devii

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan, PSA Easwaran

Description/comments : See corresponding nAmAvalI

Latest update : April 9, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 9, 2023

*sanskritdocuments.org*

# શ્રીવાગ્વાદિનિસહસ્રનામસ્તોત્રમ્

ૐ શ્રીગણેશાય નમઃ ।

બ્રહ્મોવાચ -

નન્દિકેશ્વર સર્વજ્ઞ ભક્તાનુગ્રહકારક ।
ઋદ્ધિસિદ્ધિપ્રદં નૃણાં સર્વદોષનિષૂદનમ્ ॥ ૧॥

સર્વસિદ્ધિકરં પુણ્યં સર્વકામાર્થસાધનમ્ ।
આધિવ્યાધિહરં કેન કેન વા મૃત્યુનાશનમ્ ।
વક્તુમર્હસિ દેવેશ નન્દિકેશ સુરોત્તમ ॥ ૨॥

શ્રીનન્દિકેશ્વરોવાચ -

શ‍ૃણુ બ્રહ્મન્પ્રવક્ષ્યામિ ગુપ્તાદ્ગુપ્તતરં મહત્ ।
સર્વભક્તહિતાર્થાય કથિતા કમલાસન ॥ ૩॥

સમસ્તકલહધ્વંસી લોકસ્ય લોકવલ્લભ ।
જલજાસ્સ્થલજાશ્ચૈવ વનજા વ્યોમજાસ્તથા ॥ ૪॥

કૃત્રિમા દોષજાશ્ચાપિ ભ્રાન્તભ્રાન્તિવિનાશનમ્ ।
અપસ્મારગ્રહોન્માદજનોન્મત્તપિશાચકાઃ ॥ ૫॥

દુઃખપ્રણાશનં નિત્યં સુખં સમ્પ્રાપ્યતે વિધે ।
ઇદં સ્તોત્રં ન જાનન્તિ વાગ્દેવીસ્મરણે યદિ ॥ ૬॥

ન સ સિદ્ધિમવાપ્નોતિ વર્ષકોટિશતૈરપિ ।
સર્વં સરસ્વતીનામ્નાં સદાશિવઋષિઃ સ્મૃતઃ ॥ ૭॥

છન્દોઽનુષ્ટુપ્ તથા બીજં વાગ્ભવં શક્તિ કીલકમ્ ।
રકારં સર્વકામાર્થં વિનિયોગઃ પ્રકીર્તિતાઃ ॥ ૮॥

અથ ધ્યાનં -

શુભ્રાં સ્વચ્છવિલેપમાલ્યવસનાં શીતાંશુખણ્ડોજ્જ્વલાં
વ્યાખ્યામક્ષગુણં સુધાબ્જકલશં વિદ્યાં ચ હસ્તામ્બુજૈઃ ।

વિભ્રાણાં કમલાસનાં કુચનતાં વાગ્દેવતાં સુસ્મિતાં
વાગ્દેવીં વિભવપ્રદાં ત્રિનયનાં સૌભાગ્યસમ્પત્કરીમ્ ॥

ૐ શ્રીવાગ્વાદિની વાણી વાગીશ્વરી સરસ્વતી ।
વાચા વાચામતી વાક્યા વાગ્દેવી બાલસુન્દરી ॥ ૧॥

વચસા વાચયિષ્યા ચ વલ્લભા વિષ્ણુવલ્લભા ।
બાલરૂપા સતી વૃદ્ધા વનમાલી વનેશ્વરી ॥ ૨॥

વલિધ્વંસપ્રિયા વેદા વરદા વરવર્ધિની ।
બ્રાહ્મી સરસ્વતી વિદ્યા બ્રહ્માણ્ડજ્ઞાનગોચરી ॥ ૩॥

બ્રહ્મનાડી બ્રહ્મજ્ઞાની વ્રતિ વ્રતપ્રિયા વ્રતા ।
બ્રહ્મચારી બુદ્ધિરૂપી બુદ્ધિદા બુદ્ધિદાપકા ॥ ૪॥

બુદ્ધિઃ પ્રજ્ઞા બુદ્ધિમતી બુદ્ધિશ્રી બુદ્ધિવર્ધિની ।
વારાહી વારુણી વ્યક્તા વેણુહસ્તા બલીયસી ॥ ૫॥

વામમાર્ગરતા દેવી વામાચારરસપ્રિયા ।
વામસ્ત્થા વામરૂપા ચ વર્ધિની વામલોચના ॥ ૬॥

વિશ્વવ્યાપી વિશ્વરૂપા વિશ્વસ્થા વિશ્વમોહિની ।
વિન્ધ્યસ્થા વિન્ધ્યનિલયા વિન્દુદા વિન્દુવાસિની ॥ ૭॥

વક્ત્રસ્થા વક્રરૂપા ચ વિજ્ઞાનજ્ઞાનદાયિની ।
વિઘ્નહર્ત્રી વિઘ્નદાત્રી વિઘ્નરાજસ્ય વલ્લભા ॥ ૮॥

વાસુદેવપ્રિયા દેવી વેણુદત્તબલપ્રદા ।
બલભદ્રસ્ય વરદા બલિરાજપ્રપૂજિતા ॥ ૯॥

વાક્યં વાચમતી બ્રાહ્મી વાગ્ભવાની વિધાયિકા ।
વાયુરૂપા ચ વાગીશા વેગસ્થા વેગચારિણી ॥ ૧૦॥

બ્રહ્મમૂર્તિર્વાઙ્મયી ચ વાર્તાજ્ઞા વઙ્મયેશ્વરી ।
બન્ધમોક્ષપ્રદા દેવી બ્રહ્મનાદસ્વરૂપિણી ॥ ૧૧॥

વસુન્ધરાસ્થિતા દેવી વસુધારસ્વરૂપિણી ।
વર્ગરૂપા વેગધાત્રી વનમાલાવિભૂષણા ॥ ૧૨॥

વાગ્દેવેશ્વરકણ્ઠસ્થા વૈદ્યા વિબુધવન્દિતા ।
વિદ્યુત્પ્રભા વિન્દુમતી વાઞ્છિતા વીરવન્દિતા ॥ ૧૩॥

વહ્નિજ્વાલા વહ્નિમુખી વિશ્વવ્યાપી વિશાલદા ।
વિદ્યારૂપા ચ શ્રીવિદ્યા વિદ્યાધરપ્રપૂજિતા ॥ ૧૪॥

વિદ્યાસ્થા વિદ્યયા દેવી વિદ્યાદેવી વિષપ્રહા ।
વિષઘ્ની વિષદોષઘ્ની વૃક્ષમૂલપ્રતિષ્ઠિતા ॥ ૧૫॥

વૃક્ષરૂપી ચ વૃક્ષેશી વૃક્ષફલપ્રદાયકા ।
વિવિધૌષધસમ્પન્ના વિવિધોત્પાતનાશિની ॥ ૧૬॥

વિધિજ્ઞા વિવિધાકારા વિશ્વગર્ભા વનેશ્વરી ।
વિશ્વેશ્વરી વિશ્વયોનીર્વિશ્વમાતા વિધિપ્રિયા ॥ ૧૭॥

વિભૂતિરૂપા વૈભૂતી વંશી વંશીધરપ્રિયા ।
વિશાલલોચના દેવી વિત્તદા ચ વરાનના ॥ ૧૮॥

વાયુમણ્ડલસંસ્થા ચ વહ્નિમણ્ડલસંસ્થિતા ।
ગઙ્ગાદેવી ચ ગઙ્ગા ચ ગુણાદાત્રી ગુણાત્મિકા ॥ ૧૯॥

ગુણાશ્રયા ગુણવતી ગુણશીલસમન્વિતા ।
ગર્ભપ્રદા ગર્ભદાત્રી ગર્ભરક્ષાપ્રદાયિની ॥ ૨૦॥

ગીરૂપા ગીષ્મતી ગીતા ગીતજ્ઞા ગીતવલ્લભા ।
ગિરિધારીપ્રિયા દેવી ગિરિરાજસુતા સતી ॥ ૨૧॥

ગતિદા ગર્ભદા ગર્ભા ગણપૂજા ગણેશ્વરી ।
ગમ્ભીરા ગહના ગુહ્યા ગન્ધર્વગણસેવિતા ॥ ૨૨॥

ગુહ્યેશ્વરી ગુહ્યકાલી ગુપ્તમાર્ગપ્રદાયિની ।
ગુરુમૂર્તિર્ગુરુસ્થા ચ ગોચરા ગોચરપ્રદા ॥ ૨૩॥

ગોપિની ગોપિકા ગૌરી ગોપાલજ્ઞાનતત્પરા ।
ગોરૂપા ગોમતીદેવી ગોવર્ધનધરપ્રિયા ॥ ૨૪॥

ગુણદાત્રી ગુણશીલા ગુણરૂપા ગુણેશ્વરી ।
ગાયત્રીરૂપા ગાન્ધારી ગઙ્ગાધરપ્રિયા તથા ॥ ૨૫॥

ગિરિકન્યા ગિરિસ્થા ચ ગૂઢરૂપા ગૃહસ્થિતા ।
ગૃહક્લેશવિધ્વંસિની ગૃહે કલહભઞ્જની ॥ ૨૬॥

ગગનાડી ગર્ભજ્યોતિર્ગગનાકારશોભિતા ।

ગમસાગમસ્વરૂપા ચ ગરુડાસનવલ્લભા ॥ ૨૭॥

ગન્ધરૂપા ગન્ધરૂપી ગલસ્થા ગલગોચરા ।
ગજેન્દ્રગામિનીદેવી ગ્રહનક્ષત્રવન્દિતા ॥ ૨૮॥

ગોપકન્યા ગોકુલેશી ગોપીચન્દનલેપિતા ।
દયાવતી દુઃખહન્ત્રી દુષ્ટદારિદ્ર્યનાશિની ॥ ૨૯॥

દિવ્યદેહા દિવ્યમુખી દિવ્યચન્દનલેપિતા ।
દિવ્યવસ્ત્રપરીધાના દમ્ભલોભવિવર્જિતા ॥ ૩૦॥

દાતા દામોદરપ્રીતા દામોદરપરાયણા ।
દનુજેન્દ્રવિનાશી ચ દાનવાગણસેવિતા ॥ ૩૧॥

દુષ્કૃતઘ્ની દૂરગામી દુર્મતિ-દુઃખનાશિની ।
દાવાગ્નિરૂપિણીદેવી દશગ્રીવવરપ્રદા ॥ ૩૨॥

દયાનદી દયાશીલા દાનશીલા ચ દર્શિની ।
દૃઢદેવી દૃઢદૃષ્ટી દુગ્ધપ્રપાનતત્પરા ॥ ૩૩॥

દુગ્ધવર્ણા દુગ્ધપ્રિયા દધિદુગ્ધપ્રદાયકા ।
દેવકી દેવમાતા ચ દેવેશી દેવપૂજિતા ॥ ૩૪॥

દેવીમૂર્તિર્દયામૂર્તિર્દોષહા દોષનાશિની ।
દોષઘ્ની દોષદમની દોલાચલપ્રતિષ્ઠિતા ॥ ૩૫॥

દૈન્યહા દૈત્યહન્ત્રી ચ દેવારિગણમર્દિની ।
દમ્ભકૃત્ દમ્ભનાશી ચ દાડિમીપુષ્પવલ્લભા ॥ ૩૬॥

દશના દાડિમાકારા દાડિમીકુસુમપ્રભા ।
દાસીવરપ્રદા દીક્ષા દીક્ષિતા દીક્ષિતેશ્વરી ॥ ૩૭॥

દિલીપરાજબલદા દિનરાત્રિસ્વરૂપિણી ।
દિગમ્બરી દીપ્તતેજા ડમરૂભુજધારિણી ॥ ૩૮॥

દ્રવ્યરૂપી દ્રવ્યકરી દશરથવરપ્રદા ।
ઈશ્વરી ઈશ્વરભાર્યા ચ ઇન્દ્રિયરૂપસંસ્થિતા ॥ ૩૯॥

ઇન્દ્રપૂજ્યા ઇન્દ્રમાતા ઈપ્સિત્વફલદાયકા ।
ઇન્દ્રાણી  ઇઙ્ગિતજ્ઞા ચ ઈશાની ઈશ્વરપ્રિયા ॥ ૪૦॥

ઇષ્ટમૂર્તી ઇહૈવસ્થા ઇચ્છારૂપા ઇહેશ્વરી ।
ઇચ્છાશક્તિરીશ્વરસ્થા ઇલ્વદૈત્યનિષૂદિની ॥ ૪૧॥

ઇતિહાસાદિશાસ્ત્રજ્ઞા ઇચ્છાચારીસ્વરૂપિણી ।
ઈકારાક્ષરરૂપા ચ ઇન્દ્રિયવરવર્ધિની ॥ ૪૨॥

ઇન્દ્રલોકનિવાસિના ઇપ્સિતાર્થપ્રદાયિની ।
નારી નારાયણપ્રીતા નારસિંહી નરેશ્વરી ॥ ૪૩॥

નર્મદા નન્દિનીરૂપા નર્તકી નગનન્દિની ।
નારાયણપ્રિયા નિત્યં નાનાવિદ્યાપ્રદાયિની ॥ ૪૪॥

નાનાશાસ્ત્રધરીદેવી નાનાપુષ્પસુશોભિતા ।
નયનત્રયરૂપા ચ નૃત્યનાથસ્ય વલ્લભા ॥ ૪૫॥

નદીરૂપા નૃત્યરૂપા નાગરી નગરેશ્વરી ।
નાનાર્થદાતા નલિની નારદાદિપ્રપૂજિતા ॥ ૪૬॥

નતારમ્ભેશ્વરીદેવી નીતિજ્ઞા ચ નિરઞ્જની ।
નિત્યસિંહાસનસ્થા ચ નિત્યકલ્યાણકારિણી ॥ ૪૭॥

નિત્યાનન્દકરી દેવી નિત્યસિદ્ધિપ્રદાયકા ।
નેત્રપદ્મદલાકારા નેત્રત્રયસ્વરૂપિણી ॥ ૪૮॥

નૌમીદેવીનામમાત્રા નકારાક્ષરરૂપિણી ।
નન્દા નિદ્રા મહાનિદ્રા નૂપુરપદશોભિતા ॥ ૪૯॥

નાટકી નાટકાધ્યક્ષા નરાનન્દપ્રદાયિકા ।
નાનાભરણસન્તુષ્ટાનાનારત્નવિભૂષણા ॥ ૫૦॥

નરકનાશિનીદેવી નાગાન્તકસ્થિતા પ્રિયા ।
નીતિવિદ્યાપ્રદા દેવી ન્યાયશાસ્ત્રવિશારદી ॥ ૫૧॥

નરલોકગતાદેવી નરકાસુરનાશિની ।
અનન્તશક્તિરૂપા ચ નૈમિત્તિકપ્રપૂજિતા ॥ ૫૨॥

નાનાશસ્ત્રધરાદેવી નારબિન્દુસ્વરૂપિણી ।
નક્ષત્રરૂપા નન્દિતા નગસ્થા નગનન્દિની ॥ ૫૩॥

સારદા સરિતારૂપા સત્યભામા સુરેશ્વરી ।
સર્વાનન્દકરીદેવી સર્વાભરણભૂષિતા ॥ ૫૪॥

સર્વવિદ્યાધરાદેવી સર્વશાસ્ત્રસ્વરૂપિણી ।
સર્વમઙ્ગલદાત્રી ચ સર્વકલ્યાણકારિણી ॥ ૫૫॥

સર્વજ્ઞા સર્વભાગ્યં ચ સર્વસન્તુષ્ટિદાયકા ।
સર્વભારધરાદેવી સર્વદેશનિવાસિની ॥ ૫૬॥

સર્વદેવપ્રિયાદેવી સર્વદેવપ્રપૂજિતા ।
સર્વદોષહરાદેવી સર્વપાતકનાશિની ॥ ૫૭॥

સર્વસંસારસંરાજ્ઞી સર્વસઙ્કષ્ટનાશિની । સર્વસંસારસારાણિ
સર્વકલહવિધ્વંસી સર્વવિદ્યાધિદેવતા ॥ ૫૮॥

સર્વમોહનકારી ચ સર્વમન્ત્રપ્રસિદ્ધિદા ।
સર્વતન્ત્રાત્મિકાદેવી સર્વયન્ત્રાધિદેવતા ॥ ૫૯॥

સર્વમણ્ડલસંસ્થા ચ સર્વમાયાવિમોહિની ।
સર્વહૃદયવાસિન્યા સર્વમાત્મસ્વરૂપિણી ॥ ૬૦॥

સર્વકારણકારી ચ સર્વશાન્તસ્વરૂપિણી ।
સર્વસિદ્ધિકરસ્થા ચ સર્વવાક્યસ્વરૂપિણી ॥ ૬૧॥

સર્વાધારા નિરાધારા સર્વાઙ્ગસુન્દરી સતી ।
સર્વવેદમયીદેવી સર્વશબ્દસ્વરૂપિણી ॥ ૬૨॥

સર્વબ્રહ્માણ્ડવ્યાપ્તા ચ સર્વબ્રહ્માણ્ડવાસિની ।
સર્વાચારરતા સાધ્વી સર્વબીજસ્વરૂપિણી ॥ ૬૩॥

સર્વોન્માદવિકારઘ્ની સર્વકલ્મષનાશિની ।
સર્વદેહગતાદેવી સર્વયોગેશ્વરી પરા ॥ ૬૪॥

સર્વકણ્ઠસ્થિતા નિત્યં સર્વગર્ભાસુરક્ષકા ।
સર્વભાવા પ્રભાવાદ્યા સર્વલક્ષ્મીપ્રદાયિકા ॥ ૬૫॥

સર્વૈશ્વર્યપ્રદા દેવી સર્વવાયુસ્વરૂપિણી ।
સુરલોકગતા દેવી સર્વયોગેશ્વરી પરા ॥ ૬૬॥

સર્વકણ્ઠસ્થિતા નિત્યં સુરાસુરવરપ્રદા ।
સૂર્યકોટિપ્રતીકાશા સૂર્યમણ્ડલસંસ્થિતા ॥ ૬૭॥

શૂન્યમણ્ડલસંસ્થા ચ સાત્ત્વિકી સત્યદા તથા ।

સરિતા સરિતાશ્રેષ્ઠા સદાચારસુશોભિતા ॥ ૬૮॥

સાકિની સામ્યરૂપા ચ સાધ્વી સાધુજનાશ્રયા ।
સિદ્ધિદા સિદ્ધિરૂપા ચ સિદ્ધિસ્સિદ્ધિવિવર્ધિની ॥ ૬૯॥

શ્રિતકલ્યાણદાદેવી સર્વમોહાધિદેવતા ।
સિદ્ધેશ્વરી ચ સિદ્ધાત્મા સર્વમેધાવિવર્ધિની ॥ ૭૦॥

શક્તિરૂપા ચ શક્તેશી શ્યામા કષ્ટનિષૂદિની ।
સર્વભક્ષા શઙ્ખિની ચ સરસાગતકારિણી ॥ ૭૧॥

સર્વપ્રણવરૂપા ચ સર્વ અક્ષરરૂપિણી ।
સુખદા સૌખ્યદા ભોગા સર્વવિઘ્નવિદારિણી ॥ ૭૨॥

સન્તાપહા સર્વબીજા સાવિત્રી સુરસુન્દરી ।
શ્રીરૂપા શ્રીકરી શ્રીશ્ચ શિશિરાચલવાસિની ॥ ૭૩॥

શૈલપુત્રી શૈલધાત્રી શરણાગતવલ્લભા ।
રત્નેશ્વરી રત્નપ્રદા રત્નમન્દિરવાસિની ॥ ૭૪॥

રત્નમાલાવિચિત્રાઙ્ગી રત્નસિંહાસનસ્થિતા ।
રસધારારસરતા રસજ્ઞા રસવલ્લભા ॥ ૭૫॥

રસભોક્ત્રી રસરૂપા ષડ્રસજ્ઞા રસેશ્વરી ।
રસેન્દ્રભૂષણા નિત્યં રતિરૂપા રતિપ્રદા ॥ ૭૬॥

રાજેશ્વરી રાકિણી ચ રાવણાવરદાયકા । દશાસ્યવરદાયકા
રામકાન્તા રામપ્રિયા રામચન્દ્રસ્ય વલ્લભા ॥ ૭૭॥

રાક્ષસઘ્ની રાજમાતા રાધા રુદ્રેશ્વરી નિશા ।
રુક્મિણી રમણી રામા રાજ્યભુગ્રાજ્યદાયકા ॥ ૭૮॥

રક્તામ્બરધરાદેવી રકારાક્ષરરૂપિણી ।
રાસિસ્થા રામવરદા રાજ્યદા રાજ્યમણ્ડિતા ॥ ૭૯॥

રોગહા લોભહા લોલા લલિતા લલિતેશ્વરી ।
તન્ત્રિણી તન્ત્રરૂપા ચ તત્ત્વી તત્ત્વસ્વરૂપિણી ॥ ૮૦॥

તપસા તાપસી તારા તરુણાનઙ્ગરૂપિણી ।
તત્ત્વજ્ઞા તત્ત્વનિલયા તત્ત્વાલયનિવાસિની ॥ ૮૧॥

તમોગુણપ્રદાદેવી તારિણી તન્ત્રદાયિકા ।
તકારાક્ષરરૂપા ચ તારકાભયભઞ્જની ॥ ૮૨॥

તીર્થરૂપા તીર્થસંસ્થા તીર્થકોટિફલપ્રદા ।
તીર્થમાતા તીર્થજ્યેષ્ઠા તરઙ્ગતીર્થદાયકા ॥ ૮૩॥

ત્રૈલોક્યજનનીદેવી ત્રૈલોક્યભયભઞ્જની ।
તુલસી તોતલા તીર્થા ત્રિપુરા ત્રિપુરેશ્વરી ॥ ૮૪॥

ત્રૈલોક્યપાલકધ્વંસી ત્રિવર્ગફલદાયકા ।
ત્રિકાલજ્ઞા ત્રિલોકેશી તૃતીયજ્વરનાશિની ॥ ૮૫॥

ત્રિનેત્રધારી ત્રિગુણા ત્રિસુગન્ધિવિલેપિની ।
ત્રિલૌહદાત્રી ગમ્ભીરા તારાગણવિલાસિની ॥ ૮૬॥

ત્રયોદશગુણોપેતા તુરીયમૂર્તિરૂપિણી ।
તાણ્ડવેશી તુઙ્ગભદ્રા તુષ્ટિસ્ત્રેતાયુગપ્રિયા ॥ ૮૭॥

તરઙ્ગિણી તરઙ્ગસ્થા તપોલોકનિવાસિની ।
તપ્તકાઞ્ચનવર્ણાભા તપઃસિદ્ધિવિધાયિની ॥ ૮૮॥

ત્રિશક્તિસ્ત્રિમધુપ્રીતા ત્રિવેણી ત્રિપુરાન્તકા ।
પદ્મસ્થા પદ્મહસ્તા ચ પરત્રફલદાયકા ॥ ૮૯॥

પરમાત્મા પદ્મવર્ણા પરાપરતરાષ્ટમા ।
પરમેષ્ઠી પરઞ્જ્યોતિઃ પવિત્રા પરમેશ્વરી ॥ ૯૦॥

પારકર્ત્રી પાપહન્ત્રી પાતકૌઘવિનાશિની ।
પરમાનન્દદાદેવી પ્રીતિદા પ્રીતિવર્દ્ધિની ॥ ૯૧॥

પુણ્યનામ્ની પુણ્યદેહા પુષ્ટિપુસ્તકધારિણી ।
પુત્રદાત્રી પુત્રમાતા પુરુષાર્થપુરેશ્વરી ॥ ૯૨॥

પૌર્ણમીપુણ્યફલદા પઙ્કજાસનસંસ્થિતા ।
પૃથ્વીરૂપા ચ પૃથિવી પીતામ્બરસ્ય વલ્લભા ॥ ૯૩॥

પાઠાદેવી ચ પઠિતા પાઠેશી પાઠવલ્લભા ।
પન્નગાન્તકસંસ્થા ચ પરાર્ધાઙ્ગોશ્વપદ્ધતી ॥ ૯૪॥

હંસિની હાસિનીદેવી હર્ષરૂપા ચ હર્ષદા ।
હરિપ્રિયા હેમગર્ભા હંસસ્થા હંસગામિની ॥ ૯૫॥

હેમાલઙ્કારસર્વાઙ્ગી હૈમાચલનિવાસિની ।
હુત્વા હસિતદેહા ચ હાહા હૂહૂ સદાપ્રિયા ॥ ૯૬॥

હંસરૂપા હંસવર્ણા હિતા લોકત્રયેશ્વરી ।
હુઙ્કારનાદિનીદેવી હુતભુક્તા હુતેશ્વરી ॥ ૯૭॥

જ્ઞાનરૂપા ચ જ્ઞાનજ્ઞા જ્ઞાનદા જ્ઞાનસિદ્ધિદા ।
જ્ઞાનેશ્વરી જ્ઞાનગમ્યા જ્ઞાની જ્ઞાનવિશાલધીઃ ॥ ૯૮॥

જ્ઞાનમૂર્તિર્જ્ઞાનધાત્રી જ્ઞાતવ્યાકરણાદિની ।
અજ્ઞાનનાશિનીદેવી જ્ઞાતા જ્ઞાનાર્ણવેશ્વરી ॥ ૯૯॥

મહાદેવી મહામોહા મહાયોગરતા તથા ।
મહાવિદ્યા મહાપ્રજ્ઞા મહાજ્ઞાના મહેશ્વરી ॥ ૧૦૦॥

મઞ્જુશ્રી મઞ્જુરપ્રીતા મઞ્જુઘોષસ્ય વન્દિતા ।
મહામઞ્જુરિકાદેવી મણીમુકુટશોભિતા ॥ ૧૦૧॥

માલાધરી મન્ત્રમૂર્તિર્મદની મદનપ્રદા ।
માનરૂપા મનસી ચ મતિર્મતિમનોત્સવા ॥ ૧૦૨॥

માનેશ્વરી માનમાન્યા મધુસૂદનવલ્લભા ।
મૃડપ્રિયા મૂલસંસ્થા મૂર્દ્ધિસ્થા મુનિવન્દિતા ॥ ૧૦૩॥

મુખબેક્તા મૂઢહન્તા મૃત્યુર્ભયવિનાશિની ।
મૃત્રિકા માતૃકા મેધા મેધાવી માધવપ્રિયા ॥ ૧૦૪॥

મકારાક્ષરરૂપા ચ મણિરત્નવિભૂષિતા ।
મન્ત્રારાધનતત્ત્વજ્ઞા મન્ત્રયન્ત્રફલપ્રદા ॥ ૧૦૫॥

મનોદ્ભવા મન્દહાસા મઙ્ગલા મઙ્ગલેશ્વરી ।
મૌનહન્ત્રી મોદદાત્રી મૈનાકપર્વતે સ્થિતા ॥ ૧૦૬॥

મણિમતી મનોજ્ઞા ચ માતા માર્ગવિલાસિની ।
મૂલમાર્ગરતાદેવી માનસા માનદાયિની ॥ ૧૦૭॥

ભારતી ભુવનેશી ચ ભૂતજ્ઞા ભૂતપૂજિતા ।
ભદ્રગઙ્ગા ભદ્રરૂપા ભુવના ભુવનેશ્વરી ॥ ૧૦૮॥

ભૈરવી ભોગદાદેવી ભૈષજ્યા ભૈરવપ્રિયા ।

ભવાનન્દા ભવાતુષ્ટી ભાવિની ભરતાર્ચિતા ॥ ૧૦૯॥

ભાગીરથી ભાષ્યરૂપા ભાગ્યા ભાગ્યવતીતિ ચ ।
ભદ્રકલ્યાણદાદેવી ભ્રાન્તિહા ભ્રમનાશિની ॥ ૧૧૦॥

ભીમેશ્વરી ભીતિહન્ત્રી ભવપાતકભઞ્જની ।
ભક્તોત્સવા ભક્તપ્રિયા ભક્તસ્થા ભક્તવત્સલા ॥ ૧૧૧॥

ભઞ્જા ચ ભૂતદોષઘ્ની ભવમાતા ભવેશ્વરી ।
ભયહા ભગ્નહા ભવ્યા ભવકારણકારિણી ॥ ૧૧૨॥

ભૂતૈશ્વર્યપ્રદા દેવી ભૂષણાઙ્ગી ભવપ્રિયા ।
અનન્યજ્ઞાનસમ્પન્ના અકારાક્ષરરૂપિણી ॥ ૧૧૩॥

અનન્તમહિમા ત્ર્યક્ષી અજપામન્ત્રરૂપિણી ।
અનેકસૃષ્ટિસમ્પૂર્ણા અનેકાક્ષરજ્ઞાનદા ॥ ૧૧૪॥

આનન્દદાયિની દેવી અમૃતા અમૃતોદ્ભવા ।
આનન્દિની ચ અરિહા અન્નસ્થા અગ્નિવચ્છવિઃ ॥ ૧૧૫॥

અત્યન્તજ્ઞાનસમ્પન્ના અણિમાદિપ્રસિદ્ધિદા ।
આરોગ્યદાયિની આઢ્યા આદિશક્તિરભીરુહા ॥ ૧૧૬॥ આજ્ઞા

અગોચરી આદિમાતા અશ્વત્થવૃક્ષવાસિની ।
ધર્માવતી ધર્મધરી ધરણીધરવલ્લભા ॥ ૧૧૭॥

ધારણા ધારણાધીશા ધર્મરૂપધરાધરી ।
ધર્મમાતા ધર્મકર્ત્રી ધનદા ચ ધનેશ્વરી ॥ ૧૧૮॥

ધ્રુવલોકગતા ધાતા ધરિત્રી ધેનુરૂપધૃક્ ।
ધીરૂપા ધીપ્રદા ધીશા ધૃતિર્વાક્સિદ્ધિદાયકા ॥ ૧૧૯॥

ધૈર્યકૃદ્ધૈર્યદા ધૈર્યા ધૌતવસ્ત્રેણ શોભિતા ।
ધુરન્ધરી ધુન્ધિમાતા ધારણાશક્તિરૂપિણી ॥ ૧૨૦॥

વૈકુણ્ઠસ્થા કણ્ઠનિલયા કામદા કામચારિણી ।
કામધેનુસ્વરૂપા ચ કષ્ટકલ્લોલહારિણી ॥ ૧૨૧॥

કુમુદહાસિની નિત્યં કૈલાસપદદાયકા ।
કમલા કમલસ્થા ચ કાલહા ક્લેશનાશિની ॥ ૧૨૨॥

કલાષોડશસંયુક્તા કઙ્કાલી કમલેશ્વરી ।
કુમારી કુલસન્તોષા કુલજ્ઞા કુલવર્દ્ધિની ॥ ૧૨૩॥

કાલકૂટવિષધ્વંસી કમલાપતિમોહની ।
કુમ્ભસ્થા કલશસ્થા ચ કૃષ્ણવક્ષોવિલાસિની ॥ ૧૨૪॥

કૃત્યાદિદોષહા કુન્તી કસ્તૂરીતિલકપ્રિયા ।
કર્પુરવાસિતાદેહા કર્પૂરમોદધારિણી ॥ ૧૨૫॥

કુશસ્થા કુશમૂલસ્થા કુબ્જા કૈટભનાશિની ।
કુરુક્ષેત્રકૃતા દેવી કુલશ્રી કુલભૈરવી ॥ ૧૨૬॥

કૃતબ્રહ્માણ્ડસર્વેશી કાલી કઙ્કણધારિણી ।
કુબેરપૂજિતા દેવી કણ્ઠકૃત્કણ્ઠકર્ષણી ॥ ૧૨૭॥

કુમુદઃપુષ્પસન્તુષ્ટા કિઙ્કિણીપાદભૂષિણી ।
કુઙ્કુમેન વિલિપ્તાઙ્ગી કુઙ્કુમદ્રવલેપિતા ॥ ૧૨૮॥

કુમ્ભકર્ણસ્ય ભ્રમદા કુઞ્જરાસનસંસ્થિતા ।
કુસુમમાલિકાવેત્રી કૌશિકીકુસુમપ્રિયા ॥ ૧૨૯॥

યજ્ઞરૂપા ચ યજ્ઞેશી યશોદા જલશાયિની ।
યજ્ઞવિદ્યા યોગમાયા જાનકી જનની જયા ॥ ૧૩૦॥

યમુનાજપસન્તુષ્ટા જપયજ્ઞફલપ્રદા ।
યોગધાત્રી યોગદાત્રી યમલોકનિવારિણી ॥ ૧૩૧॥

યશઃકીર્તિપ્રદા યોગી યુક્તિદા યુક્તિદાયની ।
જૈવની યુગધાત્રી ચ યમલાર્જુનભઞ્જની ॥ ૧૩૨॥

જૃમ્ભન્યાદિરતાદેવી જમદગ્નિપ્રપૂજિતા ।
જાલન્ધરી જિતક્રોધા જીમૂતૈશ્વર્યદાયકા ॥ ૧૩૩॥

ક્ષેમરૂપા ક્ષેમકરી ક્ષેત્રદા ક્ષેત્રવર્ધિની ।
ક્ષારસમુદ્રસંસ્થા ચ ક્ષીરજા ક્ષીરદાયકા ॥ ૧૩૪॥

ક્ષુધાહન્ત્રી ક્ષેમધાત્રી ક્ષીરાર્ણવસમુદ્ભવા ।
ક્ષીરપ્રિયા ક્ષીરભોજી ક્ષત્રિયકુલવર્દ્ધિની ॥ ૧૩૫॥

ખગેન્દ્રવાહિની ખર્વ ખચારીણી ખગેશ્વરી ।
ખરયૂથવિનાશી ચ ખડ્ગહસ્તા ચ ખઞ્જના ॥ ૧૩૬॥

ષટ્ચક્રાધારસંસ્થા ચ ષટ્ચક્રસ્યાધિદેવતા ।
ષડઙ્ગજ્ઞાનસમ્પન્ના ખણ્ડચન્દ્રાર્ધશેખરા ॥ ૧૩૭॥

ષટ્કર્મરહિતા ખ્યાતા ખરબુદ્ધિનિવારિણી ।
ષોડશાધારકૃદ્દેવી ષોડશભુજશોભિતા ॥ ૧૩૮॥

ષોડશમૂર્તીષોડશ્યા ખડ્ગખેટકધારિણી ।
ઘૃતપ્રિયા ઘર્ઘરિકા ઘુર્ઘુરીનાદશોભિતા ॥ ૧૩૯॥

ઘણ્ટાનિનાદસન્તુષ્ટા ઘણ્ટાશબ્દસ્વરૂપિણી ।
ઘટિકાઘટસંસ્થા ચ ઘ્રાણવાસી ઘનેશ્વરી ॥ ૧૪૦॥

ચારુનેત્રા ચારુવક્ત્રા ચતુર્બાહુશ્ચતુર્ભુજા ।
ચઞ્ચલા ચપલા ચિત્રા ચિત્રિણી ચિત્રરઞ્જિની ॥ ૧૪૧॥

ચન્દ્રભાગા ચન્દ્રહાસા ચિત્રસ્થા ચિત્રશોભના ।
ચિત્રવિચિત્રમાલ્યાઙ્ગી ચન્દ્રકોટિસમપ્રભા ॥ ૧૪૨॥

ચન્દ્રમા ચ ચતુર્વેદા પ્રચણ્ડા ચણ્ડશેખરી ।
ચક્રમધ્યસ્થિતા દેવી ચક્રહસ્તા ચ ચક્રિણી ॥ ૧૪૩॥

ચન્દ્રચૂડા ચારુદેહા ચણ્ડમુણ્ડવિનાશિની ।
ચણ્ડેશ્વરી ચિત્રલેખા ચરણે નૂપુરૈર્યુતા ॥ ૧૪૪॥

ચૈત્રાદિમાસરૂપા સા ચામરભુજધારિણી ।
ચાર્વઙ્ગા ચર્ચિકા દિવ્યા ચમ્પાદેવી ચતુર્થચિત્ ॥ ૧૪૫॥

ચતુર્ભુજપ્રિયા નિત્યં ચતુર્વર્ણફલપ્રદા ।
ચતુસ્સાગરસઙ્ખ્યાતા ચક્રવર્તિફલપ્રદા ॥ ૧૪૬॥

છત્રદાત્રી છિન્નમસ્તા છલમધ્યનિવાસિની ।
છાયારૂપા ચ છત્રસ્થા છુરિકાહસ્તધારિણી ॥ ૧૪૭॥

ઉત્તમાઙ્ગી ઉકારસ્થા ઉમાદેવીસ્વરૂપિણી ।
ઊર્ધ્વામ્નાયી ઉર્ધ્વગામ્યા ૐકારાક્ષરરૂપિણી ॥ ૧૪૮॥

એકવક્ત્રા દેવમાતા ઐન્દ્રી ઐશ્વર્યદાયકા ।
ઔષધીશા ચૌષધીકૃત્ ઓષ્ટસ્થા ઓષ્ટવાસિની ॥ ૧૪૯॥

સ્થાવરસ્થા સ્થલચરા સ્થિતિસંહારકારિકા ।

રું રું શબ્દસ્વરૂપા ચ રુઙ્કારાક્ષરરૂપિણી ॥ ૧૫૦॥

આર્યુદા અદ્ભુતપ્રદા આમ્નાયષટ્સ્વરૂપિણી ।
અન્નપૂર્ણા અન્નદાત્રી આશા સર્વજનસ્ય ચ ॥ ૧૫૧॥

આર્તિહારી ચ અસ્વસ્થા અશેષગુણસંયુતા ।
શુદ્ધરૂપા સુરૂપા ચ સાવિત્રી સાધકેશ્વરી ॥ ૧૫૨॥

બાલિકા યુવતી વૃદ્ધા વિશ્વાસી વિશ્વપાલિની ।
ફકારરૂપા ફલદા ફલવન્નિર્ફલપ્રદા ॥ ૧૫૩॥

ફણીન્દ્રભૂષણા દેવી ફકારક્ષરરૂપિણી ।
ઋદ્ધિરૂપી ઋકારસ્થા ઋણહા ઋણનાશિની ॥ ૧૫૪॥

રેણુરાકારરમણી પરિભાષા સુભાષિતા ।
પ્રાણાપાનસમાનસ્થોદાનવ્યાનૌ ધનઞ્જયા ॥ ૧૫૫॥

કૃકરા વાયુરૂપા ચ કૃતજ્ઞા શઙ્ખિની તથા ।
કૂર્મનામ્ન્યુન્મીલનકરી જિહ્વકસ્વાદુમીલના ॥ ૧૫૬॥

જિહ્વારૂપા જિહ્વસંસ્થા જિહ્વાસ્વાદુપ્રદાયકા ।
સ્મૃતિદા સ્મૃતિમૂલસ્થા શ્લોકકૃચ્છ્લોકરાશિકૃત્ ॥ ૧૫૭॥

આધારે સંસ્થિતા દેવી અનાહતનિવાસિની ।
નાભિસ્થા હૃદયસ્થા ચ ભ્રૂમધ્યે દ્વિદલે સ્થિતા ॥ ૧૫૮॥

સહસ્રદલસંસ્થા ચ ગુરુપત્નીસ્વરૂપિણી ।
ફલશ્રુતિઃ -
ઇતિ તે કથિતં પ્રશ્નં નામ્ના વાગ્વાદિની પરમ્ ॥ ૧૫૯॥

સહસ્રં તુ મહાગોપ્યં દેવાનામપિ દુર્લભમ્ ।
ન પ્રકાશ્યં મયાઽઽખ્યાતં તવ સ્નેહેન આત્મભૂઃ ॥ ૧૬૦॥

એકકાલં દ્વિકાલં વા ત્રિકાલં વાપિ ભક્તિતઃ ।
ન તેષાં દુર્લભં કિઞ્ચિત્ ત્રિષુ લોકેષુ વલ્લભ ॥ ૧૬૧॥

સાધકાભીષ્ટદો બ્રહ્મા સર્વવિદ્યાવિશારદઃ ।
ત્રિવારં યઃ પઠિષ્યતિ નરઃ શક્તિધરો ભવેત્ ॥ ૧૬૨॥

પઞ્ચધા ભાગ્યમાપ્નોતિ સપ્તધા ધનવાન્ભવેત્ ।
નવમૈશ્વર્યમાપ્નોતિ સાધકશ્શુદ્ધચેતસા ॥ ૧૬૩॥

પઠેદેકાદશો નિત્યં સ સિદ્ધિભાજનો ભવેત્ ।
માસમેકં પઠિત્વા તુ ભવેદ્યોગીશ્વરોપમઃ ॥ ૧૬૪॥

માસષટ્કં પઠેદ્ધીમાન્સર્વવિદ્યા પ્રજાયતે ।
વત્સરૈકં પઠેદ્યો માં સાક્ષાત્સર્વાઙ્ગતત્ત્વવિત્ ॥ ૧૬૫॥

ગોરોચનાકુઙ્કુમેન વિલિખેદ્ભૂર્જપત્રકે ।
પૂજયિત્વા વિધાનેન દેવીં વાગીશ્વરીં જપેત્ ॥ ૧૬૬॥

સહસ્રવારપઠનાન્મૂકોઽપિ સુકવિર્ભવેત્ ।
પઞ્ચમ્યાં ચ દશમ્યાં ચ પૂર્ણમાસ્યામથાપિ વા ॥ ૧૬૭॥

ગુરોરારાધનતત્ત્વેનાર્ચ્ચયેદ્ભક્તિભાવતઃ ।
જડં હન્તિ ગદં હન્તિ વાન્તિભ્રાન્તિવિનાશનમ્ ॥ ૧૬૮॥

બુદ્ધિ મેધા પ્રવર્ધતે આરોગ્યં ચ દિને દિને ।
અપમૃત્યુભયં નાસ્તિ ભૂતવેતાલડકિની- ॥ ૧૬૯॥

રાક્ષસીગ્રહદોષઘ્નં કલિદોષનિવારણમ્ ।
આધિવ્યાધિજલોન્મગ્ન અપસ્મારં ન બાધતે ॥ ૧૭૦॥

પ્રાતઃકાલે પઠેન્નિત્યમુન્માદશ્ચ વિનશ્યતિ ।
મેધાકાન્તિસ્મૃતિદા ભોગમોક્ષમવાપ્યતે ॥ ૧૭૧॥

મહાવ્યાધિર્મહામૂઠનિર્મૂલનં ભવેતત્ક્ષણાત્ ।
વિદ્યારમ્ભે ચ વાદે ચ વિદેશગમને તથા ॥ ૧૭૨॥

યાત્રાકાલે પઠેદ્યદિ વિજયં નાત્ર સંસયઃ ।
સિદ્ધમૂલી તથા બ્રાહ્મી ઉગ્રગન્ધા હરીતકી ॥ ૧૭૩॥

ચતુર્દ્રવ્યસમાયુક્તં ભક્તિયુક્તેન માનસા ।
બ્રાહ્મણેન લભેદ્વિદ્યા રાજ્યં ચ ક્ષત્રિયો લભેત્ ॥ ૧૭૪॥

વૈશ્યો વાણિજ્યસિદ્ધિં ચ શૂદ્રેષુ ચિરજીવિતઃ ।
વાગ્વાદિનીસરસ્વત્યાસ્સહસ્રન્નામ યસ્મરેત્ ॥ ૧૭૫॥

તસ્ય બુદ્ધિઃ સ્થિરા લક્ષ્મી જાયતે નાત્ર સંશયઃ ।
યં યં કામયતે મર્ત્યસ્તં તં પ્રાપ્નોતિ નિત્યશઃ ॥ ૧૭૬॥

અતઃપરં કિમુક્તેન પરમેષ્ટિન્ મહામતે ।

સર્વાન્કામાન્લભેત્સદ્યઃ લોકવશ્યં તિકારકઃ ॥ ૧૭૭॥

ષટ્કર્મં ચ મહાસિદ્ધિમન્ત્રયન્ત્રાદિગીશ્વરઃ ।
કામક્રોધાદહઙ્કારદમ્ભલોભં વિનશ્યતિ ॥ ૧૭૮॥

પુરુષાર્થી ભવેદ્વિદ્વાન્ વિજિત્વા તુ મહીતલે ।
નાતઃપરતરં સ્તોત્રં સરસ્વત્યા પિતામહ ॥ ૧૭૯॥

ન દેયં પરશિષ્યેભ્યો ભક્તિહીનાય નિન્દકે ।
સુભક્તેભ્યો સુશિષ્યેભ્યો દેયં દેયં ન સંશયઃ ॥ ૧૮૦॥

ઇદં સ્તોત્રં પઠિત્વા તુ યત્ર યત્રૈવ ગચ્છતિ ।
કાર્યસિદ્ધિશ્ચ જાયતે નિર્વિઘ્નં પુનરાગમઃ ॥ ૧૮૧॥

ઇતિ શ્રીભવિષ્યોત્તરપુરાણે શ્રીનન્દિકેશ્વરબ્રહ્માસંવાદે
સર્વાધારસમયે હૃદયાકર્ષણકારણે
વાગ્વાદિનીસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ।
શુભમસ્તુ ।

સંવત ૧૮૫૧ ફલ્ગુનમાસે કૃષ્ણપક્ષે નવમ્યાં સૌમ્યવાસરે
સહસ્રનામ લિખિતં, તુલસીબ્રાહ્મણ યથાપ્રત્યર્હં ચ લિખિતમ્ ॥

શ્રીં શ્રીં શ્રીં શ્રીં શ્રીં શ્રીં શ્રીં શ્રીં શ્રીં શ્રીં

Encoded by Sivakumar Thyagarajan shivakumar24 at gmail.com
Proofread by Sivakumar Thyagarajan, PSA Easwaran

*Shri Vagvadini Sahasranama Stotram*
pdf was typeset on April 9, 2023

Please send corrections to *sanskrit@cheerful.com*